# निबन्धाः

## 1. बिहारस्य विशिष्टता

भारतस्य राज्येषु बिहारराज्यम् अन्यतमम् अस्ति । प्राचीनकाले बौद्धानां बहवो विहाराः अस्मिन क्षेत्रे आसन् । ततः एवास्य नामेदं बभूव । अस्मिन् प्रदेशे भगवान् बुद्धः निर्वाणं प्राप्तवान् । तस्य कर्मक्षेत्रम् अत्रैव मुख्यतः आसीत् । अपि च जैनतीर्थंकरः महावीरः इहैव वैशाल्याम् अजायत, अत्रैवास्य निधनं पावापुरीनामके स्थाने जातम् । किञ्च सिखधर्मगुरोः गोविन्दसिंहस्य जन्म पटनानगरेऽभवत् । गयानगरं प्रसिद्धं धर्मस्थलमपि बिहारे वर्तते । बिहारस्य राजधानी पटनानगरे वर्तते । बिहारस्य जनाः कर्मठाः सरलप्रकृतयः च सन्ति । अस्य राज्यस्य भूमिः उर्वरा नदीजलैः सिक्ता भवति । गङ्गा नदी प्रदेशस्य मध्ये पश्चिमतः पूर्वां दिशं वहति । तस्याः सहायिकाः अनेका नद्यः गण्डकी, बागमती, कोशी, शोणः पुनः-पुना इत्यादयो वामतो दक्षिणतो वा तस्यां पतन्ति । राज्येऽस्मिन् अशोकः, समुद्रगुप्तः, शेरशाहः इत्यादयः प्रसिद्धाः नृपतयो बभूवुः । आधुनिकयुगे राजेन्द्रप्रसादः, जयप्रकाशनारायणः इत्यादयो नेतारो जाताः ।

## 2. संस्कृतभाषायाः महत्त्वम्

संसारस्य वर्तमानासु भाषासु संस्कृतभाषा प्राचीनतमा वर्तते । सर्वाङ्गपूर्णेयं भाषा । अस्याम् एकैकस्य वर्णस्य व्याख्या भवति । व्याकरणपुष्टा साहित्यराशिपरिपूर्णा भाषेयं स्वस्थिरतया अमरभाषा सुरभारती देवभाषा वा कथ्यते । प्रायेण चतुःसहस्रवर्षेभ्यः इयं प्रचलिता वर्तते । अस्या भाषाया रूपद्वयं वर्तते-वैदिकं लौकिकं च । वैदिकरूपे वेदाः उपनिषदश्च वर्तन्ते । लौकिके रूपे रामायणं महाभारतं काव्य-नाटक-गद्यादीनि सन्ति । इह शब्दसम्पत्तिर्विशाला, नूतनाः शब्दा अपि निर्मातुं शक्यन्ते । भाषाविज्ञानदृष्ट्या इयं भाषा

महत्त्वपूर्णा गण्यते । अस्या एव भारतस्य अनेका भाषा निर्गताः । काश्चन अस्याः प्रभावं स्वीकुर्वन्ति । किञ्च यूरोपीय-ईरानीभाषाश्च सर्वाः संस्कृतभाषया पारिवारिक-सम्बन्धेन संयुक्ताः सन्ति इति भाषाशास्त्रिणः मन्यन्ते ।

## 3. दीपावली

कार्तिकमासस्य अमावास्यातिथौ दीपावली-महोत्सवः भारते आयोजितो भवति । अस्मिन् महोत्सवे गृहं-गृहं स्वच्छीक्रियते, रात्रौ च गृहस्य परिसरे दीपमाला प्रज्वालिता भवति । अपूर्वं दृश्यं सर्वत्र प्रतिभाति । दीपज्वालनम् आनन्दस्य उत्कर्षं दर्शयति । रावणं विजित्य यदा रामः अयोध्यामागतः, तदा नगरवासिनः दीपान् प्रज्वाल्य हर्षं प्रकटितवन्तः । तस्मात् समयात् अयं महोत्सवः प्रतिवर्षम् आयोजितो जायते । दीपावल्याः समीपे अन्येऽपि उत्सवदिवसाः सन्ति । यथा धन्वन्तरिजयन्ती (कार्तिकत्रयोदश्यां), हनुमज्जन्मोत्सवः (चतुर्दश्याम्), नरकचतुर्दशी, लक्ष्मीपूजनम्, अन्नकूटः, गोवर्धनपूजा, चित्रगुप्तपूजा - यमद्वितीया चेति । एवं दीपावली वस्तुतः उत्सवावली वर्तते ।

## 4. परोपकारः

परोपकारः मानवस्य महान् गुणः वर्तते । अनेन मानवस्य सामाजिकता सिध्यति । परस्य हिताय कृतं कर्म परोपकारः इति कथ्यते । स्वकीयं सुखं तु सर्वे प्राणिनो वाञ्छन्ति किन्तु परस्य सुखं कामयमानः पुरुषः वास्तविकः पुरुषः । आत्मनः हितमपि विहाय परस्य सेवाकरणे निरताः जनाः धन्याः कथ्यन्ते, सर्वे तान् कालान्तरे देशान्तरे च स्मरन्ति । अयं दैविको गुणः वर्तते । परोपकारं विना क्षणमपि समाजः देशः वा न तिष्ठेत् । तदा समाजस्य देशस्य च कल्पनैव न भवेत् । अचेतना अपि परोपकारव्रते लग्नाः सन्ति । नद्यः परस्यार्थे जलं वहन्ति, वृक्षाः परस्यार्थे फलानि प्रयच्छन्ति । मेघाः अपि भूमेः हिताय वर्षन्ति । अतः

कथ्यते "परोपकाराय सतां विभूतयः" । संसारस्य सर्वेषु धर्मेषु परोपकारस्य प्रशंसा अनिवार्यता च दर्शिता ।

## 5. छात्रजीवनम्

मानवस्य जीवनकाले प्रथमः कालः छात्रजीवनम् । अस्मिन् समये मनुष्यः ज्ञानार्जनं बलार्जनञ्च करोति । अपि च अनुशासनं प्रति अस्य प्रवृत्तिः उत्पाद्यते । छात्रावस्थायां गुरोः महत्त्वं भवति । गुरुः शिक्षालये छात्रं समुचितान् विषयान् शिक्षयति । तेषु छात्रस्य गतिः भवति । किञ्च छात्रजीवने योग्यतानुसारेण शारीरिकः श्रमः अपि शिक्ष्यते । प्राचीनकाले छात्राः गुरुगृहं गत्वा तत्र निवसन्ति स्म । एतेन सहजीवनस्य शिक्षा लभ्यते स्म । छात्रजीवने प्राप्तम् अनुशासनम् आजीवनं लाभप्रदं भवति । अस्मिन् काले स्मृतिशक्तिः तीक्ष्णा भवति । अतः ज्ञातव्यविषयाणाम् अभ्यासः फलीभूतो जायते । छात्राः निर्धारितानां नियमानां गृहे पाठशालायां च पालनं कुर्वन्ति चेत् तेषां जीवनं सुखदं सफलं च भविष्यति।

## 6. गणतन्त्रदिवसः

1950 ई० वर्षे जनवरीमासस्य षड्विंशतितमे दिवसे भारतवर्षस्य नवीनं संविधानं कार्यरूपेण प्रारभत । तदनुसारेण अस्माकं देशः गणतन्त्रराज्यमिति अभवत् । तस्मिन् राष्ट्रपतिपदस्य व्यवस्था जाता । अस्माकं प्रथमो राष्ट्रपतिः डॉ० राजेन्द्र प्रसादः आसीत् । तदनन्तरं प्रतिवर्षं जनवरीमासस्य षड्विंशतितमः दिवसः गणतन्त्रदिवसः इति आयोजितो भवति । महान् उत्सवः तस्मिन् दिने दृश्यते । राजधान्यां दिल्लीनगर्यां भारतीयसैन्यविभागस्य प्रदर्शनं राष्ट्रस्य महत्त्वं दर्शयति । राष्ट्रपतिः तेषां सैनिकानाम् अभिवादनं स्वीकरोति । बहवो जनाः दर्शकाः तद्दृश्यं पश्यन्ति । अपरे च दूरदर्शनद्वारा अवलोकयन्ति । सम्पूर्णे भारते शिक्षालयेषु नानासंस्थासु च अयमुत्सवः आयोज्यते । कश्चिद् गणमान्यः सभां संबोधयति । वस्तुतः देशस्य गौरववर्धकः अयं दिवसः ।

## 7. उद्यानभ्रमणम्

उद्याने प्रकृतिः स्वरूपे वर्त्तमाना दृश्यते । नगरेषु उद्यानानि स्वास्थ्यपूर्णानि स्थलानि भवन्ति । तत्र वृक्षाः लताः वनस्पतयश्च पुष्पैः सर्वान् आकर्षयन्ति । क्वचित् जलपूर्णः सरोवरः अपि वर्तते । उद्यानेषु प्रातःकाले सायंकाले च नगरवासिनः यथाशक्ति भ्रमन्ति, स्वास्थ्यलाभं च कुर्वन्ति । उद्यानेषु भ्रमणाय संकीर्णाः मार्गाः कृताः भवन्ति । तान् उभयतः पुष्पिताः वनस्पतयः सौरभं दत्त्वा जनान् प्रमुदितान् कुर्वन्ति । उद्यानभ्रमणेन शुद्धः वायुः श्वासग्रहणाय लभ्यते । अतः उद्यानानि नगरस्य प्राणाः इति कथ्यन्ते । उद्यानेषु नाना पक्षिणः अपि निवसन्ति, तेन पर्यावरणस्य रक्षा भवति । पर्यावरणं शुद्धं भवेत् इति नागरिकाणां परमं कर्तव्यम् । नगरे-नगरे खण्डे-खण्डे च उद्यानानि निर्मातव्यानि । तत्र च सर्वथा निर्मलतायाः रक्षा कर्तव्या ।

## 8. विद्यालयस्य वार्षिकोत्सवः

अस्माकं विद्यालयः नगरे (ग्रामे) वर्तते । विद्यालये शिक्षायाः प्रकृष्टा व्यवस्था वर्तते । शिक्षकाः छात्राश्च परस्परं सहयोगिनः सन्ति । प्रतिवर्षं विद्यालये वार्षिकोत्सवः आयोजितः भवति । तदा एकः विशालः वितानः क्रियते । तत्र सभाध्यक्षः, अतिथिः प्रधानाध्यापकः, उद्घोषकश्च सर्वे आसीनाः भवन्ति । अन्येषां जनानां कृते आसनव्यवस्था वितानस्य निम्नभागे क्रियते । वार्षिकोत्सवे वार्षिकं प्रतिवेदनं विद्यालयस्य नवीना उपलब्धिश्च प्रस्तूयेते । मान्यः अतिथिः स्वभाषणे विद्यालयविषये स्वानुभवान् प्रकाशयति । सभापतिः अध्यक्षीयं वक्तव्यं प्रस्तौति । कार्यक्रमे छात्राः सांस्कृतिकं कार्यक्रमं प्रस्तुवन्ति । तेन सर्वेषां मनोरञ्जनं जायते । पुरस्कारवितरणं च क्रियते । अन्ततः सर्वेभ्यः मिष्टान्नवितरणं क्रियते ।

# पत्रलेखनम्

**1. परीक्षायां साफल्यविषये -**

(स्थाननाम)

दिनाङ्कः ...............

पूज्यवर्येषु पितृचरणेषु

सादरं प्रणतयः ।

अहमत्र सर्वथा सकुशलः । तथापि सर्वे कुशलिनः सन्तीति वर्तते मम विश्वासः । विशेषतः इदमेव सूचयितुं पत्रमिदं लिखामि यत् मम कक्षायाः परीक्षापरिणामः प्रकाशितः । तत्र स्वकक्षायां प्रथमं स्थानं मया लब्धम् । इदानीमधिकेन परिश्रमेणाहं पठामि । अस्मिन् वर्षे दशमकक्षायाः बोर्डपरीक्षा भविष्यति । अतएव तत्रैव उत्कृष्टपरिणामलाभाय परिश्रमः अपेक्षितः अस्ति ।

मातृचरणेषु मम प्रणामाः ।

भवतामात्मजः

......... (नाम) .......

**2. छात्रावासजीवनविषये**

(स्थाननाम)

दिनाङ्कः ......................

प्रियमित्र रमेश,

सादरम् अभिवादये ।

आशा वर्तते त्वं कुशलः असि । अहम् अपि स्वस्थः प्रसन्नः अस्मि । अस्मिन् वर्षे नामाङ्कनात् पश्चात् मह्यं छात्रावासे स्थानं दत्तं विद्यालयेन । मम उत्कृष्टः परीक्षापरिणामः तस्य कारणम् । छात्रावासे मम जीवनं सुखकरं वर्तते । सर्वे सहवासिनः सहयोगिनः सन्ति। प्रतिदिनं मम अभिवादनं कुर्वन्ति कुशलं च पृच्छन्ति । अत्र अध्ययने सुविधा अस्ति, भोजनं स्वास्थ्यकरं लभ्यते, प्रकाशव्यवस्था संतोषप्रदा विद्यते ।

अन्येभ्यः मित्रेभ्यः नमस्काराः ।

तव मित्रवरः

(.........नाम.........)

3. रेलयात्राविषये

(स्थाननाम)

दिनाङ्कः ...............

पूज्येषु मातृचरणेषु

मम वत्सलस्य पुत्रस्य प्रणामाः ।

आशासे त्वं कुशलासि । ममापि कुशलं वर्तते । विगतमासे विद्यालयेन रेलयात्रा आयोजिता । रेलयानेन वयं पटनातः वाराणसीं गताः । रेलयानं द्रुतयानम् आसीत् । तत्र एकस्मिन् कक्षे अस्माकं स्थानानि आरक्षितानि आसन् । अतएव यात्रा सुखप्रदा । अन्येषु कक्षेषु आरक्षणाभावे महान् अव्यवस्थितश्च जनसम्मर्दः आसीत् । यत्र-यत्र यानं स्थानकेषु विरमति स्म तत्र-तत्र दृश्यानि मोहकानि आसन् । वाराणस्यां त्रीणि दिनानि स्थित्वा वयं बहूनि मनोहराणि स्थलानि अभ्रमाम ।

तव वत्सलः तनयः

........ नाम .........

## 4. सान्त्वनापत्रम्

(स्थाननाम)

दिनाङ्कः ................

प्रियमित्र नवीन,

सस्नेहम् अभिवादनम् ।

अद्य मया श्रुतं यत् विगतपरीक्षायां तव परिणामः अनुकूलः नासीत् । तदर्थं त्वं बहु उद्विग्नः असि । प्रियवर ! अस्मिन् विषये मम निवेदनं वर्तते यत् जीवने सर्वदा सर्वथा च अनुकूलता न भवति । प्रतिकूला परिस्थितिः अपि यदा-कदा आगच्छति । तदर्थं निराशः न भवेत् । सदा परिश्रमः कर्तव्यः । परिश्रमेण प्रतिकूलतापि नश्यति । आशासे आगामिनी परीक्षा तव परिश्रमानुकूला भविष्यति । धैर्यं रक्षणीयम् । निराशा शक्तिं नाशयति । स्वमातरं पितरं च प्रति मम अभिवादनं निवेदय ।

तव अभिन्नः सखा

........ नाम .........

**5. वर्धापनपत्रम्**

(स्थाननाम)

दिनाङ्कः .................

प्रियानुजे शाम्भवि !

सस्नेहम् आशीर्वादः ।

अद्यैव मया ज्ञातं यत् विद्यालयस्य निबन्धप्रतियोगितायां प्रथमं पुरस्कारं त्वं प्राप्तवती । वार्षिकोत्सवे च पुरस्कृतासि । समाचारपत्रे प्रकाशितः समाचारः तत् वर्णयति । एतदर्थं मम बहुशः वर्धापनं स्वीकुरु । वस्तुतः त्वं परिवारस्य स्वग्रामस्य च गौरवं वर्धितवती । आशासे यत् एतादृशं समाचारं त्वं सदा जीवने दर्शयिष्यसि । छात्रावासे स्वजीवनविषये यदा-कदा त्वं लिख । अनेके साधुवादाः ।

तवाग्रजः

........ नाम .........

## 6. स्वग्रामस्य समस्याविषये आवेदनपत्रम्

(ग्रामनाम)

दिनाङ्कः ...............

श्रीमान् प्रखण्ड विकास पदाधिकारी महोदयः

...... प्रखण्डनाम ...........

विषयः – स्वग्रामस्य समस्या

महोदय !

निवेद्यते यत् मम ग्रामे प्रायेण एकसहस्रजनाः निवसन्ति । ते निर्धनाः धनिकाश्च सन्ति । तेषां सम्पर्कः विभिन्नैः ग्रामे नगरैश्च वर्तते । किन्तु ग्रामाद् बहिः गन्तुं मार्गः भग्नः वर्तते । अनेन ग्रामजनानां गमनागमने महत् कष्टं भवति । विशेषतः वर्षासु मार्गः पङ्किलः जायते । अतः मम भवत्सकाशं सविनयं निवेदनं वर्तते यत् मार्ग–निर्माणस्य व्यवस्थां भवान् करोतु । एतदर्थं सर्वे ग्रामजनाः भवतः कृतज्ञाः स्थास्यन्ति ।

भवतः विश्वासभाजनम्

.......... नाम ...........

## अभ्यासः

1. अनुजां प्रति छात्रावासवर्णनं कुर्वन् पत्रं लिखत ।
2. मित्रं प्रति वर्धापनपत्रं लिखत ।
3. पितरं प्रति रेलयात्राविषये पत्रं लिखत ।
4. अनुजं प्रति सान्त्वनापत्रं लिखत ।
5. मञ्जूषायाः पदं चित्वा रिक्तस्थानानि पूरयत –

| |
|---|
| अस्मि, असि, छात्रावासे, सन्ति, उत्पन्नानाम्, वर्तते, यथोचितम्, कुर्वन्ति, अस्मिन्, सर्वे |

प्रियमित्र रमेश,

सादरम् अभिवादये ।

आशा वर्तते त्वं कुशलः .............. । अहम् अपि स्वस्थः प्रसन्नः ................ । अस्मिन् ................ नामाङ्कनात् पश्चात् मह्यं ................ स्थानं दत्तं विद्यालयेन । मम उत्कृष्टः परीक्षापरिणामः तस्य कारणम् । छात्रावासे मम जीवनं सुखकरं ........ । सहवासिनः सहयोगिनः ................ । अध्ययने .................. समस्यानां ........... समाधानं च ................ ।

तव मित्रवरः

......... नाम ...........

शिक्षणशास्त्र, पाठ्यचर्या, पाठ्यक्रम एवं मूल्यांकन विभाग
राज्य शिक्षा शोध एवं प्रशिक्षण परिषद् बिहार, महेन्द्र, पटना- 6

◆ ◆ ◆